मन्त्रपुष्पम्

ॐ भद्रङ्कर्णेभिः शृणुयाम देवाः···ॐ शान्तिः शान्तिः शान्तिः।

ॐ॥ योऽपां पुष्पं वेद। पुष्पवान् प्रजावान् पशुमान् भवति। चन्द्रमा वा अपां पुष्पम्। पुष्पवान् प्रजावान् पशुमान् भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति। अग्निर्वा अपामायतनम्। आयतनवान् भवति। योऽग्नेरायतनं वेद॥

आयतनवान् भवति। आपो वा अग्नेरायतनम्। आयतनवान् भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति। वायुर्वा अपामायतनम्। आयतनवान् भवति। यो वायोरायतनं वेद। आयतनवान् भवति॥

आपो वै वायोरायतनम्। आयतनवान् भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति। असौ वै तपन्नपामायतनम्। आयतनवान् भवति। योऽमुष्य तपत आयतनं वेद। आयतनवान् भवति। आपो वा अमुष्य तपत आयतनम्॥

आयतनवान् भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति। चन्द्रमा वा अपामायतनम्। आयतनवान् भवति। यश्चन्द्रमस आयतनं वेद। आयतनवान् भवति। आपो वै चन्द्रमस आयतनम्। आयतनवान् भवति॥

य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति। नक्षत्राणि वा अपामायतनम्। आयतनवान् भवति। यो नक्षत्राणामायतनं वेद।

आयतनवान् भवति। आपो वै नक्षत्राणामायतनम्। आयतनवान् भवति। य एवं वेद॥

योऽपामायतनं वेद। आयतनवान् भवति। पर्जन्यो वा अपामायतनम्। आयतनवान् भवति। यः पर्जन्यस्यायतनं वेद। आयतनवान् भवति। आपो वै पर्जन्यस्याऽऽयतनम्। आयतनवान् भवति। य एवं वेद। योऽपामायतनं वेद॥

आयतनवान् भवति। संवत्सरो वा अपामायतनम्। आयतनवान् भवति। यस्संवत्सरस्यायतनं वेद। आयतनवान् भवति। आपो वै संवत्सरस्यायतनम्। आयतनवान् भवति। य एवं वेद। योऽप्सु नावं प्रतिष्ठितां वेद। प्रत्येव तिष्ठति॥

ॐ राजाधिराजाय प्रसह्यसाहिने। नमो वयं वैश्रवणाय कुर्महे। स मे कामान्कामकामाय मह्यम्। कामेश्वरो वैश्रवणो ददातु। कुबेराय वैश्रवणाय। महाराजाय नमः।

ॐ शान्तिः शान्तिः शान्तिः।

हरिः ॐ तत्सत्।

मेदिनीं देवी वसुंधरा स्याद्वसुधा देवी वासवीं। ब्रह्मवर्चसः पितृणागं श्रोत्रं चक्षुर्मनः। देवी हिरण्यगर्भिणी देवी प्रसूवरी। सदने सत्यायने सीद॥ समुद्रवती सावित्रीह नो देवी मह्यङ्गीं। महीधरणी महोव्यथिष्ठा श्रृङ्गे शृङ्गे यज्ञे यज्ञे विभीषिणीं। इन्द्रपत्नी व्यापिनीं सुरसरिदिह। वायुमतीं जलशयनीश्रियंधाराजां सत्यन्धो परिमेदिनी। श्वोपरिधत्तं परिगाय।

विष्णुपत्नीं महीं देवीं माधवीं माधवप्रियाम्। लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युत वल्लभाम्।

ॐ धनुर्धरायै विद्महे सर्वसिद्ध्यै च धीमहि। तन्नो धरा प्रचोदयात्। महीं देवीं विष्णुपत्नी मजूर्याम्। प्रतीचीं मेनागं हविषा यजामः। त्रेधा विष्णुरुरुगायो विचक्रमे। महीं दिवं पृथिवीमन्तरिक्षम्। तच्छ्रोणैति श्रवं इच्छमाना। पुण्यगं श्लोकं यजमानाय कृण्वती॥ ॐ शान्तिः शान्तिः शान्तिः॥

नीळासूक्तम्

तैत्तिरीय संहिता . काण्डम् . 4 प्रपाठक . 4 अनुवाक . 12

ॐ॥ गृणाहि। घृतवती सवितराधिपत्यैः पयस्वतीरन्तिराशानो अस्तु। ध्रुवा दिशां विष्णुपत्न्यघोराऽस्येशानासहसोया मनोता। बृहस्पतिं मातरिश्वोत वायुस्सन्धुवानावाता अभि नो गृणन्तु। विष्टम्भो दिवोधरुणः पृथिव्या अस्येश्याना जगतो विष्णुपत्नी॥

ॐ शान्तिः शान्तिः शान्तिः॥

दुर्गासूक्तम्

तैत्तिरीयारण्यकम्: 4 प्रपाठक : 10 अनुवाक : 2

ॐ॥ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः। स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः॥ तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम्। दुर्गां देवीगं शरणमहं प्रपद्ये सुतरसितरसे नमः॥ अग्ने त्वं पारया नव्यो अस्मान्स्वस्तिभिरति दुर्गाणि विश्वा। पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः॥ विश्वानि नो दुर्गहा जातवेदः सिन्धुन्न नावा दुरितातिपर्षि। अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम्॥ पृतनाजितगं सहमानमुग्रमग्निगं हुवेम परमात्सधस्थात्। स नः पर्षदतिदुर्गाणि विश्वाक्षामद्देवो अति दुरितात्यग्निः॥ प्रत्नोषि कमीड्यो अध्वरेषु सन्नाच्च होता नव्यश्च सत्सि। स्वाञ्चाऽग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्व॥ गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्र विष्णो-रनुसंचरेम। नाकस्य पृष्ठमभिसंवसानो वैष्णवीं लोक इह मादयन्ताम्॥

ॐ कात्यायनाय विद्महे। कन्यकुमारि धीमहि। तन्नो दुर्गिः प्रचोदयात्॥ ॐ शान्तिः शान्तिः शान्तिः॥

तद्विष्णोः परमं पदगं् सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्। तद्विप्रासो विपन्यवो जागृवागं् सस्समिन्धते। विष्णो र्यत्परमं पदम्॥

पर्याप्त्या अनन्तरायाय सर्वस्तोमोऽति रात्र उक्तममहर्भवति सर्वस्याप्त्यै सर्वस्यजित्त्यै सर्वमेव तेनाप्नोति सर्वं जयति॥

ॐ शान्तिः शान्तिः शान्तिः॥

श्रीसूक्तम्

ॐ॥ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्॥ अश्वपूर्वां रथमध्यां हस्तिनाद-प्रबोधिनीम्। श्रियं देवीमुपह्वये श्रीर्मा देवीर्जुषताम्॥ कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्। पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम्॥ चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्। तां पद्मिनीमीं शरणमहं प्रपद्येऽअलक्ष्मीर्मे नश्यतां त्वां वृणे॥ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः। तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः॥ उपैतु मां देवसखः कीर्तिश्च मणिना सह। प्रादुर्भूतोस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे॥ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्। अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात्॥ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीगं् सर्वभूतानां तामिहोपह्वये श्रियम्।

मनसः काममाकूतिं वाचः सत्यमशीमहि। पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥ कर्दमेन प्रजाभूता मयि संभव कर्दम। श्रियं वासय मे कुले मातरं पद्ममालिनीम्॥ आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे। निच देवीं मातरं श्रियं वासय मे कुले। आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥ आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम्। सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह। तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्विन्देयं पुरुषानहम्॥

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम्। श्रियः पञ्चदशर्चं च श्रीकामः सततं जपेत्। पद्मानने पद्म ऊरू पद्माक्षी पद्मसंभवे। त्वं मां भजस्व पद्माक्षी येन सौख्यं लभाम्यहम्॥ अश्वदायी गोदायी धनदायी महाधने। धनं मे जुषतां देवि सर्वकामांश्च देहि मे॥ पुत्र पौत्रधनं धान्यं हस्त्यश्वादिगवे रथम्। प्रजानां भवसि माता आयुष्मन्तं करोतु माम्॥ धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः। धनमिन्द्रो बृहस्पतिर्वरुणं धनमस्तु ते॥ वैनतेय सोमं पिब सोमं पिबतु वृत्रहा। सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः॥ न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः। भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत्सदा॥ वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः। रोहन्तु सर्वबीजान्यव ब्रह्म द्विषो जहि॥ पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्मदलायताक्षि। विश्वप्रिये विष्णु मनोऽनुकूले त्वत्पादपद्मं